योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०२०

अज्ञातलेखकः

श्रीदेव्युवाच ।

स ते भर्ताद्य संपन्नो द्विजो भूपत्वमागतः ।

या सावरुन्धती नाम ब्राह्मणी सा त्वमङ्गने ।। १

इहेमौ कुरुतो राज्यं तौ भवन्तौ सुदम्पती ।

चक्रवाकाविव नवौ भुवि जातौ शिवाविव ।। २

एष ते कथितः सर्वः प्राक्तनः संसृतिक्रमः ।

भ्रान्तिमात्रकमाकाशमेवं जीवस्वरूपधृक् ।। ३

भ्रमादस्माच्चिदाकाशे भ्रमोऽयं प्रतिबिम्बितः ।

असत्य एव वा सत्यो भवतोर्भवभङ्गदः ।। ४

तस्माद्भ्रान्तिमयः कः स्यात्कोवा भ्रान्त्युज्झितो भवेत्

सर्गो निरर्गलानर्थबोधान्नान्यो विजृम्भते ।। ५

श्रीवसिष्ठ उवाच ।

इत्याकर्ण्य चिरं चारु विस्मयोत्फुल्ललोचना ।

भूत्वोवाच वचो लीला लीलालसपदाक्षरम् ।। ६

लीलोवाच ।

देवि भोस्त्वद्वचो मिथ्या कथं संपन्नमीदृशम् ।

क्व विप्रजीवः स्वगृहे क्वेमे वयमिह स्थिताः ।। ७

तादृग्लोकान्तरं सा भूस्ते शैलास्ता दिशो दश ।

कथं भान्ति गृहस्यान्तर्मद्भर्ता येष्ववस्थितः ।। ८

मत्त ऐरावतो बद्धः सर्षपस्येव कोटरे ।

मशकेन कृतं युद्धं सिंहौघैरणुकोटरे ।। ९

पद्माक्षे स्थापितो मेरुर्निगीर्णो भृङ्गसूनुना ।

स्वप्नाब्दगर्जितं श्रुत्वा चित्रं नृत्यन्ति बर्हिणः ।। १०

असमंजसमेवैतद्यथा सर्वेश्वरेश्वरि ।

तथा गृहान्तः पृथिवी शैलाश्चेत्यसमञ्जसम् ।। ११

यथावदेतद्देवेशि कथयामलया धिया ।

प्रसादानुगृहीते हि नोद्विजन्ते महौजसः ।। १२

श्रीदेव्युवाच ।

नाहं मिथ्या वदामीदं यथावच्छृणु सुन्दरि ।

भेदनं नियतीनां हि क्रियते नास्मदादिभिः ।। १३

विभिद्यमानामन्येन स्थापयाम्यहमेव याम् ।

मर्यादां तां मया भिन्नां कोऽपरः पालयिष्यति ।। १४

सग्रामद्विजजीवात्मा तस्मिन्नेव स्वसद्मनि ।

व्योम्न्येवेदं महाराष्ट्रं व्योमात्मैव प्रपश्यति ।। १५

प्राक्तनी सा स्मृतिर्लुप्ता युवयोरुदितान्यथा ।

स्वप्ने जाग्रत्स्मृतिर्यद्वदेतन्मरणमङ्गने ।। १६

यथा स्वप्ने त्रिभुवनं संकल्पे त्रिजगद्यथा ।

यथा कथार्थसंग्रामो मरुभूमौ जलं यथा ।। १७

तस्य ब्राह्मणगेहस्य सशैलवनपत्तना ।

इयमन्तः स्थिता भूमिः संकल्पादर्शयोरिव ।। १८

असत्यैवेयमाभाति सत्येव घनसर्गता ।

तस्मात्सत्यावभासस्य चिद्व्योम्नः कोशकोटरे ।। १९

असत्याद्यत्समुत्पन्नं स्मृत्या नाम तदप्यसत् ।

मृगतृष्णातरङ्गिण्यां तरङ्गोऽपि न सद्यतः ।। २०

इदं त्वदीयं सदनं तद्गेहाकाशकोशगम् ।

विद्धि मां त्वां च सर्वं च तच्चिद्व्योमैव केवलम् ।। २१

स्वप्नसंभ्रमसंकल्पस्वानुभूतिपरम्पराः ।
प्रमाणान्यत्र मुख्यानि संबोधाय प्रदीपवत् ।। २२
स्थितो ब्राह्मणगेहान्तर्द्विजजीवस्तदम्बरे ।
ससमुद्रवना पृथ्वी स्थिताब्ज इव षट्पदः ।। २३
तस्याः कस्मिंश्चिदेकस्मिन्पेलवे कोणकोटरे ।
इदं पत्तनदेहादि केशोण्ड्रक इवाम्बरे ।। २४
तस्मिन्नस्मिन्पुरे तन्वि तदेव सदनं स्थितम् ।
तस्मात्किं त्रसरेण्वन्तर्जगद्वृन्दमिव स्थितम् ।। २५
परमाणौ परमाणौ सन्ति वत्से चिदात्मनि ।
अन्तरन्तर्जगन्तीति किंत्वेतन्नाम शङ्क्यते ।। २६
लीलोवाच ।
अष्टमे दिवसे विप्रः स मृतः परमेश्वरि ।
गतो वर्षगणोऽस्माकं मातः कथमिदं भवेत् ।। २७
श्रीदेव्युवाच ।
देशदैर्घ्यं यथा नास्ति कालदैर्घ्यं तथाङ्गने ।
नास्त्येवेति यथान्यायं कथ्यमानं मया शृणु ।। २८
यथैतत्प्रतिभामात्रं जगत्सर्गावभासनम् ।
तथैतत्प्रतिभामात्रं क्षणकल्पावभासनम् ।। २९
क्षणकल्पं जगत्सर्वं त्वत्तामत्तात्मजन्मनाम् ।
यथावत्प्रतिभासस्य वक्ष्ये क्रममिमं शृणु ।। ३०
अनुभूय क्षणं जीवो मिथ्यामरणमूर्च्छनम् ।
विस्मृत्य प्राक्तनं भावमन्यं पश्यति सुव्रते ।। ३१
तदेवोन्मेषमात्रेण व्योम्न्येव व्योमरूप्यपि ।
आधेयोऽयमिहाधारे स्थितोऽहमिति चेतति ।। ३२
हस्तपादादिमान्देहो ममायमिति पश्यति ।
यदेव चेतति वपुस्तदेवेदं स पश्यति ।। ३३

एतस्याहं पितुः पुत्रो वर्षाण्येतानि सन्ति मे ।

इमे मे बान्धवा रम्या ममेदं रम्यमास्पदम् ।। ३४

जातोऽहमभवं बालो वृद्धिं यातोऽहमीदृशः ।

बान्धवाश्चास्य मे सर्वे तथैव विचरन्त्यमी ।। ३५

चित्ताकाशघनैकत्वात्स्वेऽप्यन्येऽपि भवन्ति ते ।

एवं नामोदितेऽप्यस्य चित्ते संसारखण्डके ।। ३६

न किंचिदप्यभ्युदितं स्थितं व्योमैव निर्मलम् ।

स्वप्ने द्रष्टरि यद्वच्चित्तद्वद्दृश्ये चिदेव सा ।। ३७

सर्वगैकतया यस्मात्सा स्वप्ने दृष्टदर्शना ।

यथा स्वप्ने तथोदेति परलोकदृगादिभिः ।। ३८

परलोके यथोदेति तथैवेहाभ्युदेति सा ।

तत्स्वप्नपरलोकेह लोकानामसतां सताम् ।। ३९

न मनागपि भेदोऽस्ति वीचीनामिव वारिणि ।

अतो जातमिदं विश्वमजातत्वादनाशि च ।। ४०

स्वरूपत्वात्तु नास्त्येव यच्च भाति चिदेव सा ।

यथैव चेत्यनिर्हीणा परमव्योमरूपिणी ।। ४१

सचेत्यापि तथैवैषा परमव्योमरूपिणी ।

तस्माच्चेत्यमतो नान्यद्वीचित्वादीव वारितः ।। ४२

वीचित्वं च रसे नास्ति शशशृङ्गवदेव हि ।

सैव चेत्यमिवापन्ना स्वभावादच्युताप्यलम् ।। ४३

तस्मान्नास्त्येव दृश्योऽर्थः कुतोऽतो द्रष्टृदृश्यधीः ।

निमिषेणैव जीवस्य मृतिमोहादनन्तरम् ।। ४४

त्रिजगद्दृश्यसर्गश्रीः प्रतिभामुपगच्छति ।

यथादेशं यथाकालं यथारम्भं यथाक्रमम् ।। ४५

यथोत्पादं यथामातृ यथापितृ यथौरसम् ।

यथावयो यथासंविद्यथास्थानं यथेहितम् ।। ४६

यथाबन्धु यथाभृत्यं यथेहास्तमयोदयम् ।

अजात एव जातोऽहमिति चेतति चिद्वपुः ।। ४७

देशकालक्रियाद्रव्यमनोबुद्धीन्द्रियादि च ।

झटित्येव मृतेरन्ते वपुः पश्यति यौवने ।। ४८

एषा माता पिता ह्येष बालोऽभूवमहं त्विति ।

नानुभूतोऽनुभूतो वा यः स्यात्स्मृतिमयः क्रमः ।। ४९

पश्चादुदेत्यसौ तस्य पुष्पस्येव फलोदयः ।

निमिषेणैव मे कल्पो गत इत्यनुभूयते ।। ५०

रात्रिर्द्वादशवर्षाणि हरिश्चन्द्रे तथा ह्यभूत् ।

कान्ताविरहिणामेकं वासरं वत्सरायते ।। ५१

मृतो जातोऽहमन्यो मे पितेति स्वप्नतास्विव ।

अभुक्तस्यैव भोगस्य भुक्तधीरुपजायते ।। ५२

भुक्तेऽप्यभुक्तधीर्दृष्टमित्यलङ्कितवादिषु ।

शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ।

विप्रलम्भोऽपि लाभश्च मदस्वप्नादिसंविदि ।। ५३

तैक्ष्ण्यं यथा मरिचबीजकणे स्थितं स्वं

स्तम्भेषु चारचितपुत्रकजालमन्तः ।

दृश्यं त्वनन्यदिदमेवमजेऽस्ति शान्तं

तस्यास्तिबन्धनविमोक्षदृशः कुतः काः ।। ५४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने परमार्थवर्णनं नाम विंशः सर्गः ।। २० ।।